वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः, साहित्याचार्यः

अष्टाचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ।।
अथर्व० १०।२।३१।

प्रकृतसूक्ते पुरिशयनकारिणः पुरुषस्य शरीररचनायां तत्र "केन पार्ष्णी आभृते पूरुषस्य०" अथर्व० १०।२।१) इत्यारभ्य "मूर्धानमस्य संसीव्याऽथर्वा हृदयं च यत्०" (अथर्व० १०।२।२६) इत्यादिपर्यन्तं पार्ष्ण्यादिमूर्धान्तानाम् अवयवानाम् देहे तेषां यथा स्थानमवस्थानस्य च वर्णनीयतया देवपदस्य शक्तौ इन्द्रियार्थे, पूः पदस्य च शरीरार्थे निर्धान्त्रितायाम् अपि मन्त्रस्य नगरविशेषपरको योऽर्थो बलादिव प्रतीयते सोऽभिधामूलो व्यङ्ग्य एवेति दर्शयति । अष्टचक्रा१ अष्टसंख्याकानि ब्रह्मचक्रस्वाधिष्ठानादीनि योगशास्त्रेषु प्रसिद्धा न चक्राणि यस्यामिति बहुव्रीहिः । नवद्वाराणि श्रोत्रनेत्रघ्राणमुखपायूपस्थरूपाणि यस्यां तथाविधेति पूर्ववद् बहुव्रीहिसमासः । श्रोत्रादीनां त्रयाणां प्रत्येकं द्वे द्वे मुखादीनां त्रयाणां च प्रत्येकम् एकमेकमिति मिलित्वा नवद्वाराणि । "देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये" इति मेदिनी । उक्तलक्षणा देवानामिन्द्रियाणामावासभूता । पिण्डे श्रोत्रादीनीन्द्रियाणि ब्रह्माण्डगताऽऽकाशसूर्यादिदेवानां प्रतिनिधिभूतानीति वेदेषु बहुत्र प्रतिपादितम् । पूः पूर्यते तनुः । सा हि प्रतिक्षणं विघटनसंघटनशीलैः शरीरघटकैः कोशैः पूर्यते । "पूः शरीरे नगर्यां च ।" इत्यनेकार्थसंग्रहे श्रीहेमचन्द्राचार्याः । देवानाम् आवासादेव पूरयम् अयोध्या -- रोगादिभिरसुरैरयोधनीयाऽधर्षणीया

---

१ प्रथमं ब्रह्मचक्रं स्यात् त्रिरावर्तं भगाकृति ।
अपाने मूलकन्दाख्ये कामरूपं च तज्जगुः ।।५
स्वाधिष्ठानं द्वितीयं स्याच्चक्रं तन्मध्यगं विदुः ।
पश्चिमाभिमुखं लिङ्गं प्रवालाकृतिसन्निभम् ।।६
तृतीयं नाभिचक्रं स्यात्तन्मध्ये भुजगी स्थिता ।
पंचाऽऽवर्ता महाशक्तिश्चिद्रूपा विद्युदाकृतिः ।।७
चतुर्थं हृदये चक्रं विज्ञेयं तदधोमुखम् ।
ज्योतीरूपं च तन्मध्ये हंसं ध्यायेत् प्रयत्नतः ।।८
पंचमं कण्ठचक्रं स्यात्तत्र वामे इडा भवेत् ।
दक्षिणे पिङ्गलाज्ञेया, सुषुम्णा मध्यतः स्थिताः ।।९
षष्ठं तु तालुकाचक्रं घण्टिकास्थानमुच्यते ।
दशमद्वारमार्गं तु राजदन्तं च तज्जगुः ।।१०
भ्रूचक्रं सप्तमं विद्याद् बिन्दुस्थानं च तद्विदुः ।
भ्रुवोर्मध्ये वर्तुलं च ध्यात्वा ज्योतिः प्रमुच्यते ।।११
अष्टमं ब्रह्मरन्ध्रं स्यात् परनिर्वाणसूचकम् ।
तद् ध्यात्वा सूचिकाग्राभं धूमाकारं विमुच्यते ।।१२
नवमं ब्रह्मचक्रं स्याद् दलैः षोडशभिर्युतम् ।
संविद्रूपा च तन्मध्ये शक्तिरूर्ध्वा स्थिता परा ।।१३

शार्ङ्गधरपद्धतिस्थ योगप्रकरणात् उद्धृतानि पद्यानीमानि ।।

एतानि चक्राण्यत्र क्रमशः-मूलाधार, स्वाधिष्ठान, मणिपूरा, ऽनाहत, विशुद्धाऽऽज्ञासहस्राराऽऽख्यानि । ननु वेदे चक्राणामष्टत्वमिह तु नवत्वमिति मिथो विरोधे कतरो गरीयानिति चेत् श्रुति स्मृत्योर्विरोधे श्रुतिरेव बलीयसीति शास्त्रविदो वदन्ति । किंच शास्त्रेषु यच्चक्रनिरूपणं दृश्यते तत्साधकानां श्रद्धानुरोधेन क्वचिद्विकल्पते--सुषुम्णायां सदाशक्तिश्चित्रास्यान्ममवल्लभे । तस्यां मम मतेकार्या ब्रह्मरन्ध्रादिकल्पना । इति शिव सहितायाः पंचमपटलस्य १६५ तमे पद्ये प्रतिपादितम् ।

भवति। यावदेते देवा अप्रमादाः इमां पालयन्ति तावन्न जरा रोगो मृत्युर्वा इमामभिभवितुमलम्। तस्यां पुर्यां हिरण्ययः हिरण्मयः, हिरण्यवर्णो वा। ज्योतिषावृतः जीवनज्योतिषा ज्ञानज्योतिषा वावृतः परिवारितः। स्वर्गः स्वर्गोपमः स्वर्लोकं गच्छति, साधकं स्वर्लोकं प्रति गमयति वेति तथाविधः कश्चित्कोशो ज्ञानमयः आनन्दमयस्तदुभयात्मको वा सदा सन्निहितः। तत्रैव चात्मपरमात्मनोर्निवासः१।

एवं चक्रद्वारदेवाऽदिपदानाम् इन्द्रियाधिष्ठानभूतदेहपरकेऽर्थेऽभिधया नियन्त्रितेऽपि नगरपरकोऽपरोऽर्थः प्रतीयते। तथाहि-अष्टभिश्चक्रैर्वृत्ताकारैश्चतुष्पथैः, नवभिश्च महाद्वारैः सुशोभिता। देवानाम् विद्यादानसदाचारादिभिर्गुणैर्द्योतमानानाम्। देवो दानाद्वा दीपनाद्वा। द्युस्थानो भवतीति वेति निरुक्ते (७।४।१५) श्री यास्कः। पू नगरी,

अयोध्येति नाम। तस्यां हिरण्ययः हिरण्यरत्नादिमयः। स्वर्गः=स्वर्गोपमः। ज्योतिषावृतः रत्नानां कान्त्या। नक्तन्दिवं भासमानः कोशो राजकोशः सन्निहित इति शेषः।

रूढिर्योगापहारिणीति नयेन अयोध्यादिपदानाम् अयोधनाऽऽर्हाऽऽदिरूपा यौगिकार्था रूढैर्नगरविशेषादिरूपैरर्थैर्बाध्यन्ते तस्माद् रूढार्थानामेव मुख्यत्वम् इति तु न वाच्यम्। अस्तु लोके रूढ्या यौगिकस्य बाधः वेदे तु यौगिकार्थस्यैव मुख्यत्वम् इति रूढिप्रकरणे प्राक् प्रतिपादितमिति तस्याऽत्र पिष्टपेषणमसाम्प्रतम्।

अस्यां शाब्द्यां व्यञ्जनायां शब्दस्य प्रधानता अर्थस्य च सहकारिता। तदाह—

व्यङ्ग्याऽर्थावगतावस्यां शब्दस्यैव प्रधानता।
व्यञ्जकोऽसावतोऽर्थस्य तत्र तु सहकारिता॥
२८१॥

पूर्वोक्तायाम् अभिधामूलव्यञ्जनायाम् शब्दस्य प्रधानतया यद्यपि तस्यैव व्यञ्जकत्वं तथाऽप्यसौ व्यङ्ग्योऽर्थः स्व प्रतीतौ वाच्यमर्थमपेक्षते इति तस्याऽप्यत्र सहकारिता। किं च सहितावेव शब्दार्थौ काव्यमित्युक्तेस्तयोरन्यतरस्य मुख्यत्वेऽपरस्य सहकारिता स्वयं प्राप्ता भवतीत्युच्यते—

सहितावेव शब्दार्थौ काव्यं प्राक् प्रतिपादितम्।
तयोरेकस्य मुख्यत्वेऽपरस्य सहकारिता॥
२८२॥

एवं शाब्दीं व्यञ्जनां निरूप्य अथ आर्थीं व्यंजनां प्रदर्शयति—

वाच्यो लक्ष्यस्तथा व्यंग्य इत्यर्थस्त्रिविधो मतः।
व्यापारोऽन्यार्थधीहेतुस्तस्यार्थी व्यञ्जनेष्यते॥

तस्य त्रिविधस्य अर्थस्य यो व्यापारो वक्तृसम्बोध्यादिवैशिष्ट्याद् अपरमर्थं व्यनक्ति सा आर्थी व्यञ्जनेति नाम्नाऽभिधीयते।

---

१. तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते।
तस्मिन् यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः॥
अथर्व० १०।२।३२।

त्रयोऽराः=रागद्वेषमोहाः। एतैरवष्टब्धे जीवनमरणचक्रे जीवः पुनः पुनरावर्तते। अथवा स्थूलसूक्ष्मकारणशरीराणि एव अराः। त्रिप्रतिष्ठिते=त्रिषु सत्त्वरजस्तमोगुणेषु प्रतिष्ठिते। यक्षम्–ब्रह्म="स तस्मिन्नाकाशेस्त्रियमाजगाय बहुशोभमानामुमाम् हैमवतीम्। तां होवाच किमेतद्यक्षमिति। सा ब्रह्मेति होवाच।" केनोपनिषद् खण्ड० ४,३,४। २५,२६ इन्द्रः आत्मा। आत्मन्वत् यक्षमेव, ब्रह्मविदो ब्रह्मेति विदुः। आत्मन्वत्=आत्मसदृशम्, चेतनत्वात्। अतएव–द्वासुपर्णा सयुजा सखाया इत्युक्तम्। अथवा आत्मना सह स्थितम्–समानं वृक्षं परिषस्वजाते० इति वचनात्।

वक्तृ-सम्बोध्य-तद्भिन्नविशिष्टव्यक्तिसन्निधेः
काक्वाः वाक्यस्य वाच्यस्य वैशिष्ट्याद्देशकालयोः ।
प्रसङ्गस्याऽथवा सोऽर्थव्यापारोऽन्यार्थबोधकृत्
अत्रार्थस्य प्रधानत्वादार्थीयं व्यंजना मता ।।
२८३।।

परप्रतिपत्तये शब्दप्रयोक्ता वक्ता । यमभिलक्ष्य शब्दः प्रयुज्यते स सम्बोध्यः, स च प्रायेण मध्यमपुरुषरूपः । वाग्व्यापारविषयीभूता तत्र सन्निहिता परोक्षेण बोधनीया काचिद् व्यक्तिस्तृतीया,सा तु तस्यैव शब्दस्याऽन्यमेवाऽर्थं गृह्णाति । काकुः शोकभीत्यादिभिः कण्ठध्वनिभेदः । वाक्यम् योग्यताकांक्षासन्निधियुक्तानां पदानां समूहः । प्रस्तावः प्रकरणम् । देशो वननदीतीरयुद्धक्षेत्रादिः। कालो वसन्तशरदादिः । अर्थः वाच्यलक्ष्य व्यंग्यरूपः। एषां वैशिष्ट्याद् अर्थस्य यो व्यापारः प्रतिभावतां सहृदयानां चेतसि अन्यम् अर्थं प्रकाशयति स हि अर्थस्य प्राधान्याद् व्यङ्ग्यार्थप्रतीतेः प्रधानहेतुत्वाद् आर्थी व्यंजनेति नाम्नाभिधीयते । यथा गतोऽस्तमर्कः इति वाक्यम् केनचित् सेनानायकेन गुप्तप्रदेशनिगूढान् स्वसैनिकान् प्रति कथितम् वक्तृबोद्धव्यदेशकालवैशिष्ट्यात्–समुचितोऽयमवसरः शत्रावाक्रमणस्येति, केनचिद् गोपालकेन वने गाश्चारयता स्वसहचरान् प्रत्युक्तम्–संह्रियन्तां गावः, कालोऽयं वनाद् ग्रामं प्रति गन्तुमिति, गुरुकुलाश्रमे गुरुणा स्वशिष्यान् उद्दिश्य अभिहितम्=अलंक्रीडित्वा, प्रत्यासीदति सन्ध्योपासनवेलेति, सार्थवाहेन स्वजनान् प्रति उदीरितम्–अलमग्रे गत्वा, रात्रौ विश्रामयोग्यमन्विष्यतां किमपि सुरक्षितं स्थानमिति तं तमर्थं वक्त्रादिवैशिष्ट्यात् प्रत्याययति । यथावा––

क्षेत्रं स्वकीयमपरेण कदर्थ्यमान-
मालोक्य कस्य हृदि नाम भवेन्न रोषः ।
अन्वेषयंश्चपलः कन्दुकमत्र लुप्तं
क्रीडाऽधुना पुनरपीह निवारितोऽपि ।।

स्वक्रीडाक्षेत्राऽभ्याशे उद्यानद्रुमेषु पक्वफलान्यालोक्य लालाक्लिन्नवदनाभ्यां द्वाभ्यां छात्राभ्यां दुरभिसन्धिर्व्यधायि । तदनुसारम् एकः फलाहरणाय लुप्तकन्दुकान्वेषणमिषेण उद्यानं प्रविष्टः । द्वितीयः कदाचिदुद्यानपालागमनं सूचयितुं सावधानो बहिरेवाऽवस्थितः । अथ अचिरेण दूरादायान्तं क्षेत्ररक्षकं दृष्ट्वा द्वितीयो वदति क्षेत्रं स्वकीयमित्यादि । क्षेत्रं स्वकीयं केनचित्कदर्थ्यमानमालोक्य कस्य खलु चेतसि क्रोधो न जायेत । त्वं तु मया मुहुर्मुहुर्विनिवारितोऽपि अत्रैव क्रीडनप्रवृत्त उद्यानदिशि कन्दुकं बलादभिहतवान् । तृणगुल्मादौ विलीनः स सम्प्रति दुर्लभ एव । इत्यस्य वाच्यार्थः । स चार्थ उद्यानपाल आगच्छति तन्निवर्तस्वेति सुहृदं प्रति व्यनक्ति । वक्तृबोद्धव्यव्यतिरिक्तः तत्र सन्निहितः उद्यानपालो यद्यभिनवस्तर्हि तदुक्तेर्वाच्यार्थमेव गृह्णाति । यदि तु प्रतिदिनमेव तथाविधैश्छात्रैराकुलीकृतस्तर्हि शठाविमौ फलानि चोरयितुमागतौ अकाण्ड एव मामुपस्थितं विलोक्य कन्दुकाऽन्वेषणमिषेण स्वदुष्कृत्यमपह्नुवाते इत्यपरमेवाऽर्थं जानाति । अत्र वक्तृसम्बोध्याऽन्यसन्निधिदेशवैशिष्ट्यादार्थी व्यञ्जना । इह मुख्यार्थबाधाऽभावात् वाच्यार्थ एव व्यञ्जनामुत्थापयति न लक्षणाद्वारा ।

यथा वा––

देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रा देव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ।।
वेणिसंहारे

अत्र वक्ता अश्वत्थामा । सम्बोध्यः कर्णः । परशुरामनिकृत्तक्षत्रकुलकण्ठगलद्रुधिरपूरितह्रदा कुरुक्षेत्रसमरभूमिर्देशः । तत्रैव सन्निहितौ अन्यौ पुरुषौ कृपदुर्योधनौ । अत्र पुरा परशुरामेण क्षत्रियान्निहत्य तेषां शोणितपूर्णह्रदेषु पितृतर्पणेन

यथा पितुर्वैरप्रतिशोधो व्यधायि तथा मयापि पाण्डवकुलमुन्मूल्य स कर्तुं शक्यते इत्यश्वत्थामोक्तेर्वाच्योऽर्थः। एषां वैशिष्ट्येन परशुरामशापाद् दिव्याऽस्त्रप्रयोगाऽक्षमस्त्वं न महाराजदुर्योधनस्य मनोरथं पूरयितुं शक्त इति कर्णं प्रति, द्रोणो न ममैव तातः प्रत्युत भवतोऽपि प्रियबन्धुः तस्तदपमानप्रतीकारो भवदभिमतश्चेत् पितुरनन्तरं मामेव कौरवसेनापतिपदेऽभिषेक्तुं भवान् महाराजं प्रेरयतिति कृपं प्रति, युष्मदीयबले पाण्डववंशविनाशाय केवलमहमेव क्षमो न कर्णः कश्चिदपरो वा, तस्माद् भवता स्वहितमिष्येत चेन्नाऽऽहमुपेक्षणीय इति दुर्योधनं प्रति व्यञ्जनया व्यज्यते। यथा वा--

पृथिव्या अहमुदन्तरिक्षमारुहम्
अन्तरिक्षाद्दिवमारुहम्।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्।

यजु० १७।६७॥

देवता--अग्निः। ऋषिः-विधृतिः। छन्दः--पिपीलिकामध्या बृहती।

पृथिव्या अहमिति। पृथिव्याः पार्थिव स्थूलविषयेभ्यः समुत्थाय स्वमनोवृत्तिमाकृष्य क्रमेणाहम् अन्तरिक्षम् स्थूलविषयाऽभावेऽपि तत्सम्बन्धि चिन्तनप्रसूतमानसवासनानां लोकमारुहम्। साधकपक्षे आरोहेयमित्याकाङ्क्षा। सिद्धसम्बन्धे आरूढोऽहमिति सन्तोषः। अन्तरिक्षं कस्मात्? अन्तरा क्षान्तं भवति इति निरुक्ते (२।३।१०) श्री यास्कः। एतेन तत्रत्यविषयाणामपि अन्तःशून्यत्वमवगम्यते। तस्मात् समुत्थितोऽहं दिवं योगसाधनलब्धदिव्यभोगानां लोकम् आरोहेयम् आरूढो वेति पूर्ववत् साधकस्य सिद्धस्य च पक्षे यथायथं योज्यम्। कं सुखम्, न कम् अकम् दुःखमित्यर्थः। न अकं नाकः सुखम्। दुःखेन सर्वथाऽस्पृष्टम् आत्मानन्दरूपमित्यर्थः। अथवा न अकमस्मिन्निति बहुव्रीहिः। आनन्दभिन्नमप्यानन्दबहुलम्, न तु सर्वात्मना आनन्दमयम्। रजस्तमसोरभिभवात् समुद्रिक्तायाः सत्त्ववृत्तेः प्राधान्यात् सुखबहुलम् सिद्धसम्बन्धे सत्त्ववृत्तेरपि क्षयात् स्वात्मानन्दरूपमात्रम्। तदुक्तं योगवार्तिके --"सत्त्वेनान्यतमे हन्यात् सत्त्वं सत्त्वेन चैव हि।" "युञ्जीत योगी निर्जित्य त्रीन् गुणान परमात्मनि। तन्मयश्चात्मतो भूत्वा चिद्वृत्तिमपि संत्यजेत्।" तदुच्यते--

प्रकाशनार्थं दीपस्य शलाकायाः प्रयोजनम्।
कोऽर्थः सत्त्वशलाकाया आत्मदीपे प्रकाशिते॥

मन्त्रेऽस्मिन् वक्ता चिन्तको वा अग्निः। सहि ज्ञानाग्निना प्रकाशितान्तःकरणः साधकः सिद्धो वा। अतितप्तलोहपिण्डवल्लक्षणया सोऽग्निरुक्तः इत्यतिशयोक्तिरलंकारः। देशः-पृथिव्यन्तरिक्षद्युस्वर्लोकाः। इह सामान्यस्य मानवस्य शरीरद्वारा अन्तरिक्षादिगमनं बाधितम् तेन एषा वैशिष्ट्याल्लक्षणया दृढभावनाया ध्यानस्य च महिम्ना तस्य एतस्माद् वासनालोकात्समुत्थानं प्रकाशात्मकेषु लोकेषु उत्तरोत्तरमूर्ध्वगमनं च लक्ष्यते। तेन च क्रमशो दैहिकव्यक्तित्वविगलनात्तस्य शश्वदानन्दरूपसमवाप्तिर्व्यज्यते। यत्तु यज्ञकर्मणि--एषां लोकानाम् (पृथिव्यन्तरिक्षादीनाम्) रोहेण सवानाम् (प्रातःसवनमाध्यन्दिनतृतीयसवानाम्) आरोहः समाम्नातः (निरुक्ते अ० ७। पा० ६। ख० ४) -- सूक्तविशेषान् पठन्तो याज्ञिका यजमानस्य तं तं लोकं प्रति गमनं वर्णयन्ति तदभिनयमात्रम्। यच्च वैज्ञानिकाश्चन्द्रयानादिद्वारा ऊर्ध्वलोकान् गच्छन्ति जिगमिषन्ति वा तत्र भौतिके जगति मुख्यार्थस्यैवोपपन्नत्वान्न लक्षणाया व्यञ्जनाया वाऽवकाशः। किंच अयमेवार्थः प्रकारान्तरेण ऋग्वेदेऽप्युक्तः--

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥

ऋ० १।५०।१०

उत् अन्तरिक्षलोकः, उत्तरो द्युलोकः, उत्तमः स्वर्लोकः । उत्तमं ज्योतिः–भौतिके जगति सूर्यः आध्यात्मिके तु आत्मा ।

यथा वा—

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाऽभिमर्शनः ।।

ऋ० १०।६०।१२

देवता–हस्तः । ऋषिः बन्धुश्रुतबन्धुप्रभृतयः। छन्दः पंक्तिः । मन्त्रोऽयमथर्ववेदेऽपि दृश्यते । प्राण्यङ्गमात्रस्य अचेतनस्य हस्तस्य भगवत्त्वं ततोऽप्यधिकतरत्वं वा बाधितम् । तेनात्र लक्षणा । सा वक्त्रादिवैशिष्ट्यात् व्यञ्जनामुत्थापयति । वक्त्राऽत्र कश्चित्कुशलो वैद्यः । सम्बोध्यो मृतप्रायः कश्चिद्रोगी । वैद्यस्य असामान्यं चिकित्साप्रावीण्यमात्मविश्वासः, रोगिणः सम्बन्धिजनानाम् आश्वासश्च व्यज्यते ।

अथ काकुः—शोकभीत्यादिभिः कण्ठध्वनिभेदेन वाच्यार्थव्यतिरिक्तस्य कस्यचिद् अर्थस्य व्यञ्जनम् । यथा—

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्याऽऽवासे स्थितमनुचितारम्भनिभृतं,
गुरुः खेदं खिन्ने मयि भजति नाऽद्यपि कुरुषु ?।।

वेणिसंहारे इह काक्वा कुरुषु युधिष्ठिरस्य क्रोधो युक्तो ननु मयीति व्यज्यते ।

यथा वा—

अभीदमेक मेको अस्मि निःषाड्
अभिद्वा किमु त्रयः करन्ति ?
खले न पर्षान् प्रतिहन्मि भूरि
किं मा निन्दन्ति शत्रवोऽनिन्द्राः ।।

ऋ० १०।४८।७।

देवता–इन्द्रः । ऋषिः वैकुण्ठ इन्द्रः । छन्दः जगती ।

अभीदमेक मिति—अहम् एकः अन्यसाहाय्यनिरपेक्ष एव एकं शत्रुम् अभिअस्मि अभिभवामि । निःषाट् शत्रवो यथा निःशेषाः स्युस्तथा तान् सहते प्रतिकरोतीति तादृग्विधोऽहम् अथवा शत्रून् नितरां सहते निरुणद्धीति सः द्वावप्यसह्यौ प्रत्यर्थिनौ अभिभवामि, त्रयोऽपि सहागता वा ते मे किमु कुर्वन्ति ? न किमपि कर्तुं शक्नुवन्तीति काक्वा व्यज्यते । अहं खले अन्ननिष्पादनस्थाने कृषकः पर्षान् गोधूमादिस्तम्बानिव खले संग्रामे पर्षान् निष्ठुरान् शत्रूनपि भूरि प्रतिहन्मि । अनिन्द्राः इन्द्रविरोधिनस्ते शत्रव इन्द्रं मां अत्यन्तसमिद्धतेजसं किं निन्दन्ति । इन्द्र इन्दतेर्वा इन्धतेर्वा अत्यन्तैश्वर्यशाली समिद्धतेजा वा अत्र विरोधितार्थे नञ् । "तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता । अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः । अत्र खलपर्षपदयोः श्लेषः । अत्र खलः संग्रामः सस्यनिष्पादनस्थानं वा । खलः खलतेर्वा स्खलतेर्वा । अयमपीतरः खलः (अन्नपूलकनिष्पादनस्थानम्) एतस्मादेव समास्कन्नो भवतीति (निरुक्ते अ० ३। पा. २। ख.१०) श्रीयास्कः । पर्षः परुषो निष्ठुरः शत्रुः अन्नपूलको वा । इह श्लेषानुप्राणिता उपमा ।

यथा वा—

इच्छन्ति देवाः सुन्वन्तं, न स्वप्नाय स्पृहयन्ति ।
यन्ति प्रमादमतन्द्राः । ऋ० ८।२।१८।

देवता–इन्द्रः । ऋषिः–मेधातिथिः काण्वः, आङ्गिरसः प्रियमेधश्च । तथा सामवेदे मन्त्रसंख्या ७२१ ।

इच्छन्ति देवा इति ० देवाः ज्ञानज्योतिषा दीप्यमानाः, अन्येभ्योऽपि स्वसञ्चितज्ञानसंपदः प्रदातारो वा सत्पुरुषाः । सुन्वन्तम्–यज्ञादिसत्कर्मसु सततततत्परम्, तपसा वाष्पीकृतं ध्यानप्रणाल्या परिस्रुतं भगवतः सोमस्य भक्तिरसं हृदयभाजने स्रावयन्तम् । अथवा आत्मसरिति

स्नान्तं जनम् इच्छन्ति कामयन्ते तेन सहावस्थानमिच्छन्ति । तदुक्तम् आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटादयोर्मिः । तत्राऽभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ।। ते स्वप्नाय निद्रायै निद्रालवे जनाय वा न स्पृहयन्ति । इदं तथ्यं मनोगतं कुर्वाणाः अतन्द्राः निरलसाः साधकाः, अपि कदाचित् प्रमादं यन्ति ? प्रमादं प्राप्नुवन्ति ? नेति काक्वा व्यज्यते । षुञ् अभिषवे । अभिषवः स्नपनं पीडनं, स्नानं सुरासन्धानं वेति सिद्धान्तकौमुद्यां श्री दीक्षिताः । पौराणिकास्तु–'आदित्या ऋभवोऽस्वप्ना अमृता अमृतान्धसः । इत्यमरः' इत्यनुसारम् देवाः कदाचिन्न स्वपन्तीति मन्यन्ते ।

अथवा—

ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ।।
यजु० ४०-१

देवता–आत्मा । ऋषिः दीर्घतमाः । छन्दः अनुष्टुप् ।

ईशा वास्येति–जगत्यां पृथिव्यां लोकत्रये वा यत् किञ्च जगत् यावन्मात्रं स्थावरजङ्गमात्मकं पदार्थजातं विद्यते । जगत्पदेनात्र स्थावरस्याप्युपलक्षणम् । तावन्मात्रं सर्वमपि ईशा अस्य स्वामिना परमात्मना वास्यम् आच्छादनीयम् व्याप्तं तदीयमेव न तवेति भावः । ईष्टे इतीट् । तेन ईशेति तृतीयान्तं पदम् । ईश् ऐश्वर्ये धातोः क्विपि रूपम् । तेन तस्मात्कारणात् । त्यक्तेन भुंजीथाः त्यागभावनया परित्यक्तस्वस्वामिभावसम्बन्धपूर्वकम् अस्य भोगं कुरु । मागृधः लोभं मा कार्षीः । इदं ममैवास्त्विति गृधिं त्यज । त्यक्तेनेति त्यज् धातो र्भावे क्त प्रत्ययः । कस्यस्विद् धनम् धनं कस्य स्वित् ? न कस्याऽपीति काक्वा व्यज्यते । स्विदिति निपातोऽनर्थको वितर्कद्योतको वा । वस आच्छादने धातो र्ण्यत्प्रत्यये वास्यम् ।

अथ वाक्य वैशिष्ट्ये व्यञ्जना । वाक्यमाकांक्षायोग्यतासत्तियुक्तं पदजातम् । यत्र व्यंग्यार्थप्रतीतावनेकसाकांक्षपदानां योग आवश्यकः । यथा—

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ।
किं जातमधुना मित्र यूयं यूयं वयं वयम् ।।

उत्तरवाक्ये अधुना प्रयोग साकांक्षत्वाय पूर्वपदे तदापुरादिपदानामन्यतमस्य प्रयोगोऽपरिहार्यः । तस्मिन्नध्याहृते (पुराअधुनापदयोः प्रयोगात्) अनयो वैशिष्ट्येन यदाहं धनधान्यवान् आसं तदा तव मयि निरतिशया प्रीतिरासीत् अधुना संपत्तिनाशे तु त्वं सर्वथैव मां विस्मृतवानसि । तेन तव प्रीतिर्मम धने एव आसीदिति व्यज्यते ।

यथा वा—

तथा तदस्तु सोमपाः सखे वज्रिन् तथा कृणु ।
यथा त उश्मसीष्टये ।। ऋ० १।३०।१२

तथातदिति । हे सोमपाः सौम्यानां जनानां पालक, वज्रिन् वज्रहस्तत्वात् दुष्टानां नियामक देव, तव भक्ता वयम् इष्टये अभिलषितसिद्धये त उश्मसि त्वामेव कामयामहे, नान्यम् । यतस्त्वमेव सर्वेभ्य उत्कृष्टः प्रदातासि । अतस्त्वं तथा कृणु कुरु अस्माकमपि च तत्तथैवास्तु यथा वयं कामयामहे । वाचां शक्तेः परिमितत्वात् भक्तः स्वहृदि वर्तमानाः सर्वाः कामनाः शब्दैः प्रकटयितुमक्षमः । अत्र यथा तथापदयोर्वैशिष्ट्यात् – त्वं सर्वान्तर्यामी सर्वज्ञः सर्वशक्तिमांश्चासि तस्माद् वाचामविषयानपि ममाभिलाषान् त्वं पूरयेति व्यज्यते ।

यथा वा—

यथेमां वाचं कल्याणीमावदानि जनेभ्यः
ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय च
स्वाय चारणाय च० ।। यजु० २६।२

देवता–ईश्वरः । ऋषिः–लौगाक्षिः । छन्दः स्वराडत्यष्टि ।

यथा अहम् ईश्वरः इमां कल्याणीं सर्वजनमङ्गलविधायिनीं वेदवाचं जनेभ्यः सृष्ट्यादावुत्पन्नेभ्योऽग्निवायुप्रभृतिभ्यः आवदानि उपदिष्टवानस्मि तथा यूयमपि इमां ब्रह्मराजन्याभ्यां ब्राह्मणेभ्यः क्षत्रियेभ्यः, शूद्राय च अर्याय च अन्त्यजेभ्यो वैश्येभ्यश्च, स्वाय च अरणाय च स्वजनेभ्यः परेभ्यश्च उपदिशत । अर्यः स्वामिवैश्ययोः । (पाणि० ३।१।१०३) अरणः अपार्णो भवति (निरुक्ते ३।१।१) यास्कः अपगतजलसम्बन्धः परकीयइत्यर्थः । अर्णं उदकनाम । अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् । इत्यमरः । मन्त्रस्यास्य प्रथमचरणे प्रयुक्तं यथेति पदं तावत्साकांक्षं पूर्णार्थं च न भवति यावदुत्तरवाक्ये तथेति पदं प्रयुज्य तदनुसारं वाक्यं न पूर्येत । अत्र भगवान् वक्ता अन्ये वेदविदः सम्बोध्याः । यथा तथेत्यनेकपदयोरत एव वाक्यस्य वैशिष्ट्यात् वेदे मानवमात्रस्याधिकारो व्यज्यते ।

इत्थमभिधा लक्षणा व्यञ्जनाख्यास्तिस्रो वृत्तयो निरूपिताः । किन्तु अभिधया पदानामर्थेषूपस्थापितेष्वपि वाक्ये तेषां पदार्थानां मिथः कर्तृत्वकर्मत्वादिरूपसम्बन्धविनिश्चयाय मीमांसकानामेकेऽभिहितान्वयवादिनो भाट्टास्तात्पर्याख्यामपरां वृत्तिम् उररी कुर्वन्ति । तेषामयमाशयः——देवदत्तो ग्रामं गच्छतीत्युक्ते देवदत्त इति पदस्य तन्निरूपितव्यक्तिविशेषरूपः, तत्रस्थस्य सु प्रत्ययस्य कर्तृत्वरूपः, ग्रामपदस्य तन्निर्दिष्टगृहसमवायरूपः, तदनन्तरवर्तिनोऽम् प्रत्ययस्य कर्मत्वरूपः, गच्छतीति पदस्य वर्तमानकालिकी गमनानुकूला कृतिरिति चार्थो यद्यपि प्रातिस्विकतया पृथक् पृथक् प्रतीयते तथापि देवदत्तनिष्ठा ग्रामकर्मिका वर्तमाना गमनानुकूला कृतिरितिरूपमन्वितमर्थमभिधातुं नाभिधा क्षमते; तस्याः पदार्थोपस्थापनमात्रेण प्रक्षीणशक्तित्वात् । अतस्तत्कृते काचिदपरा वृत्तिरवश्यमभ्युपेया सा च तात्पर्याख्या । दृश्यते हि कदाचित्प्रतिपदमर्थावबोधेऽपि न वाक्यतात्पर्यावगमः । तदुक्तं साहित्यदर्पणे श्रीविश्वनाथैः——

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ।।

सा० द० २।२०

एतद्विपरीतं प्रभाकरानुवर्तिनोऽपरे मीमांसकास्तु——अन्वितान्येव पदानि प्रथमतोऽभिधीयन्ते अतस्तेषामनन्तरमन्वययोजनं तदर्थमपरावृत्तिश्च नाऽपेक्ष्यते इत्याहुः । वाक्यं हि भाषाया मूलघटकं तच्च अन्वितमेव । बालकोऽन्वितैर्वाक्यैः देवदत्त गामानय, गां बधान अश्वमानयेत्यादिरूपैर्भाषां शिक्षते न अनन्वितैः पदैरिति प्राक् प्रतिपादितम् । इति व्यञ्जनाप्रकरणं समाप्तम् ।

इति चतुर्थ उन्मेषः

गणतन्त्राभिनन्दनम्

श्री नारायण शास्त्री काङ्कर:

गणतन्त्र ! नमस्तुभ्यं
सर्वतस्तेऽभिनन्दनम् ।
प्राणप्रियस्त्वमस्माकं
कुर्मस्ते स्मरणं वयम् ।।१।।

पूर्वजानां महात्यागात्
कठोरात् तपसस्तथा ।
त्वामासाद्य वयं सौख्यं
स्वातन्त्र्यस्य लभामहे ।।२।।

त्वत्कृपातोऽधुनास्मासु
शासका न विदेशिन: ।
स्वदेशिनो वयं कुर्म:
स्वयमात्मसु शासकान् ।।३।।

स्वतन्त्रो जायते प्राणी
स्वतन्त्रो म्रियते च स: ।
जन्ममृत्योर्द्वयोर्मध्ये
परतन्त्र: कथं स हि ।।४।।

कृत्रिमं पारतन्त्र्यं न
रोचयामो वयं क्वचित् ।
स्वातन्त्र्यं ये समीहन्ते
वयं तेषां सहायका: ।।५।।

इमं स्वभावमस्माकं
परिचिन्वन्ति ये जना: ।
आत्मीया इव भूत्वा ते
मैत्रीं कुर्वन्त्यकृत्रिमाम् ।।६।।

केवलं दोष एकोऽयं
गणतन्त्र! त्वयि प्रभो!
राजानं यत्र मत्वा स्वं
कश्चित् कञ्चिन्न मन्यते ।।७।।

अत एव महत् खातं
शासके शासिते पुन:
उद्भूय त्वद्विनाशाय
पुर आयाति भीषणम् ।।८।।

अस्मासु भारतीयेषु
त्वत्प्रियेष्वितरेषु च ।
दुर्दशेयं न जायेत
परेशं प्रार्थयामहे ।।९।।

धारयन्तो वयं साम्यम्
अन्योन्यं सुख-दु:खयो: ।
छत्रच्छायां तवातुल्याम्
आवसाम सदैव हि ।।१०।।

विद्या बुद्धि: सदाचारो
जलमन्नं धनं बलम् ।
शुद्धा भक्ति: परेशे च ।
सर्वमेतत् सदाऽस्तु न: ।।११।।

अधिकारं धनं भूमिं
यश: स्त्रीं च परस्य हि ।
अपहर्त्तुं बलादिच्छा
जायतां नहि कस्यचित् ।।१२।।

दुर्भावना न जायेत
द्वेषो नश्यतु नाशकः ।
कुदृष्टिर्न भवेत् क्वापि
प्रसादोऽस्तु पदे पदे ॥१३॥

अन्योन्यं वर्धतां प्रेम
नाशुभं कोऽपि चिन्तयेत् ।
मित्रस्य चक्षुषा पश्यन्
कुर्यात् सर्वः सहायताम् ॥१४॥

शासकः शासितः सर्वः
सुमना जायतां सदा ।
मिथो वञ्चयतां नासौ
स्वीयं कार्यं करोतु च ॥१५॥

शिक्षा व्यर्था न दीयेत
जीविका न मिलेद् यया ।
बुभुक्षितो न जानाति
पापं पुण्यं च कर्हिचित् ॥१६॥

स्त्रीणां भवतु सम्मानः
कश्चित् ता नैव धर्षयेत् ।
तासामन्तर्व्यथाशापात्
समृद्धिर्हि विनश्यति ॥१७॥

ददतां गुरवो विद्यां
शिष्याः संगृह्णतां च ताम् ।
सर्वकारो नियुञ्जीत
यथास्थानं च तान् बुधान् ॥१८॥

निर्भया निरहंकारा
नीरोगाश्च निरागसः ।
निरीर्ष्या निरपस्माराः
सर्वे सन्तु सदाशयाः ॥१९॥

कञ्चित् सन्तापयेन्नैव
बृहतीयं महार्घतः ।
विकार्यताऽपि कञ्चिन्न
क्षीणं कुर्यात् कदाचन ॥२०॥

भारतं भा-रतं भूयात्
संस्कृतं स्याद् गृहे गृहे
विश्वस्मिन् भ्राजतां विश्वे
संस्कृतिः संस्कृताश्रिता ॥२१॥

माहात्म्यं तेऽद्भुतं ख्यातं
गणतन्त्र महाप्रभो !
शरणं त्वां समायाता
अस्मात्कामं प्रपूरय ॥२२॥

ग्रहस्थितेर्जीवने प्रभावः

श्री विद्याभूषण: गणेशराम शर्मा

विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।१।।

अयि वेदवेदाङ्गदर्शनसाहित्यादिविविधविद्यापारावारपारीणा ज्ञानविज्ञानसम्पन्नबुद्धयः सकलकलाकलापकुशलाः श्रद्धाविश्वासभाजः सम्माननीया विद्वांसो महाभागाः ! सततसामयिक साहित्यानुशीलनप्रवणाः प्रियाः पाठकबन्धवो महानुभावाश्च ! जानन्त्येवात्रभवन्तो भद्रभव्यभावानुभूतिशीलाः प्रौढानुभवशालिनः सज्जना यदिह भौतिकविज्ञानार्थशास्त्रराजनीतिवाणिज्यव्यवसायप्रधाने परमाणूदजनविस्फोटनाप्तामोघशक्तिसंदृप्ते विद्युद्गतितीव्रतमजवे युद्धाग्निविभीषिकासंत्रस्ते सर्वतः सर्वराष्ट्रप्रजाजनजीवनसंघर्षतरलेऽस्मिन्नवसभ्यताविकाशयुगे केचन दुराग्रहग्रहग्रस्ता उदरभरणमात्रपुरुषार्थवादिनो यन्त्रैकशरणचेतनाः परदेशीयाचारविचारधाराचाकचक्यचञ्चलचेतसः स्थूलबुद्धयो जडसभ्यताग्रहग्रहिला जनाः प्राच्यं प्रतीच्यं ज्ञानं विज्ञानं तत्त्वतः पूर्णतया साधिकारं न जानन्तोऽस्य ब्रह्माण्डस्य सृष्टिस्थितिलयकारणे परमात्मनीश्वरे तत्प्रेरितशक्तीनां सत्तायां चाश्रद्दधाना भारतीयवेदवेदाङ्गदर्शनशास्त्रतत्त्वसिद्धान्तान् केवलं कपोलकल्पनाकल्पितानिव निस्सारान् सर्वांशतो मिथ्या प्रमाणयितुं दुश्चेष्टन्त इति विशेषतो वैदिकयज्ञानुष्ठानकर्मकाण्डविज्ञाने प्राचीनायुर्वेदचिकित्सापद्धतौ फलितज्यौतिषतन्त्रे तु नवशिक्षातानामेतेषां नांशतोऽपि श्रद्धाभावलवलेशो विद्यते ततस्ते ज्यौतिषशास्त्रस्य फलिततन्त्रोक्तग्रहप्रभावाणां सत्यत्वेऽतिशयसंशयाः परप्रत्ययनेयबुद्धयः सन्देहोद्भ्रान्तमस्तिष्काः फलादेशसिद्धान्तमकर्मण्यानां दैववादं रूढीवादं च जोघुष्यमाणाः सदा दैवज्ञानाक्षिपन्ति । केचित्पुनरास्तिक्यभावापन्नाः स्वयं भारतीया भगवति परमेश्वरे तत्प्रयोजितानां दैवीशक्तिनाम् सत्तायां बहुविश्वसन्तोऽपि च वर्त्तमानविश्वस्य नानाराष्ट्राणां नव्यवैज्ञानिकैः सप्रयोगं सप्रमाणं प्रत्यक्षं च प्रतिष्ठापितस्य विज्ञानविकाशक्रमस्य तत्त्वावबोधाय यावदपेक्षितं बौद्धिकं स्तरमस्पृशन्तः संकीर्णहृदयत्वाच्छ्रद्धाजडतां रूढिवादप्रियतां कूपमण्डूकत्वं द्रढयन्तः स्वदेशीयानाम् तत्तच्छास्त्राणामधीतिबोधाचरणप्रचारणैः प्राप्य पारमार्थिकं ज्ञानं सोपपत्तिकं चानासाद्य जीविकावृत्तिनिर्वाहमात्रपर्याप्तं ज्यौतिषायुर्वेदादिविद्यानां केवलं पल्लवग्राहिपाण्डित्यं समाश्रयन्तोऽन्धेन नीयमाना अन्धा इव प्रजासु बुद्धिभेदं जनयन्तो भ्रमोत्पादनं कुर्वन्ति । परिणामतोऽस्माकं भारतीयं ज्योतिर्विज्ञानं प्रखरं भास्वरं प्रत्यक्षं सदपि कैश्चित् स्वार्थपरायणैर्नक्षत्रसूचिभिर्याचकैर्मौहूर्तिकैश्चापकर्षतां नीतं किञ्चित्कलुषितं मलिनीकृतमिव च दृश्यते । प्राचीना नवीना वानभिज्ञास्तत्तद्विद्यानां साङ्गोपाङ्गं तलस्पर्शि पारमार्थिकं निगूढं ज्ञानमनाश्रयन्तो गम्भीरतत्त्वावबोधे मोमुह्यन्ते चेत्तदतीव स्वाभाविकम् । परदेशीयाः प्रजाः कामं किमपि वदन्तु भारतीयानां विद्यानां विषये परन्तु महद्दुःख तु तदा जायते मार्मिकाणां यदास्माकं राष्ट्रनेतारः प्रामाणिकाः पुरुषाः शिक्षिता विज्ञा वैज्ञानिकाः स्वात्मानं शिक्षितं दीक्षितं सभ्यम्मन्याश्चापि स्वदेशस्य कला विद्या ज्ञानं विज्ञानं प्रति तत्तद्विद्याविशेषज्ञान्विदुषः प्रति चानास्थाम - श्रद्धां जुगुप्सां तिरस्कारभावनां च प्रथन्ते । एवं सति फलिततत्त्वसिद्धान्तनिरूपणमद्यत्वे कियत्कठिनं कष्टसाध्यं वारण्यरोदनमिवमोघं भवतीति सरलतयानासं चानुमातुं शक्येत विचक्षणैः पाठकैः । साध्वाह श्रीमान् भास्कराचार्यवर्यः सिद्धान्तशिरोमणेर्गोलाध्याये:—

"ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते,
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ।

ते गोलाश्रयिणोऽन्तरेणगणितं गोलोऽपि न ज्ञायते, तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ।। ।।१।।

सत्यप्येवमत्राद्य भारतीयज्योतिर्विज्ञानदृशा फलितसिद्धान्तमधिकृत्य सर्वेषामपि जडचेतनानां जीवने खगोलस्थानां ग्रहाणां प्रभावः पतति न वा ? यदि च पतति तदा सः कथं बोधगम्यः स्यात् ? ग्रहाणां प्रभावः पतितोऽपि स खलु निवार्यो वानिवार्यो वा भवितुमर्हति नवेति विषयेष्वेषु कश्चिद्विमर्शो बुधानां सर्वसाधारणानां पाठकानां च पुरः समुपस्थाप्यते प्रसंङ्गात् । ज्ञानस्यानन्तत्वान्मानवबुद्धेरल्पत्वात्तत्तद्विषयेष्वल्पज्ञत्वाच्चात्र विषये प्रमेयोपपादने गच्छतो मे प्रमादात्स्खलनानि विशेषज्ञा बुधाः क्षाम्यन्त्विति विनिवेद्य प्रकृतमनुसरामिः——

एतत्तु नास्तिका आस्तिकाः पण्डिता मूर्खा ज्ञानिनो विज्ञानविदः सर्वेऽपि स्वजीवने प्रतिदिनं प्रत्यक्षमेवानुभवन्ति स्वप्रतीतेः प्रामाण्यात् स्वीकुर्वन्ति च यदाकाशे संचरतां केषांचिज्ज्योतिष्पिण्डानां स्थूलो वा सूक्ष्मो वा महीयान् वाल्पीयान् वा प्रभावो विश्वस्य सर्वेष्वपि च भूभागेषु दिग्दिगन्तेषु सर्वेषु सचेतनेषु जीवेषु पदार्थेष्वपि च सदा सर्वदा सर्वतः सर्वत्र न्यूनाधिकं निश्चयेन पततीति । तत्रापि केषांचन ग्रहनक्षत्रतारकाणां प्रभावस्तथा परिपतन् दृश्यते यश्चर्मचक्षुर्भ्यामेवानुभवितुं शक्यते । उदाहरणार्थं तावत्सूर्यस्यैव प्रभावं वयमत्र किञ्चिच्चिन्तयेम चेत्तदा स्थितिसुस्पष्टा जायेत तथाहि——

प्रातर्यदा सूर्यः पूर्वाकाशक्षितिजे समुदेति तदा तस्य किरणजालं भूमावन्तरिक्षे सर्वासु दिक्षु च प्रसरति । तस्यालोकः सर्वं वै ब्रह्माण्डं व्याप्नोति । तस्यातपऊष्मा च सर्वत्रानुभूयते । मानवाः पशवः खगाः सरीसृपाः कीटाः पतङ्गादयश्च सर्वेऽपि जीवाः सूर्योदयात् स्वजीवने कामपि नवीनामेव संजीवनीं शक्ति, कर्मक्षमतां, स्फूर्तिं चासाद्य सद्यश्चेतनां बलमोजः, क्रियाशक्ति, कर्मक्षमतां वात्मनि विदन्तः सोत्साहं कर्मसु प्रवर्तन्ते । न केवलं सचेतना एवापि तु जडपदार्थाश्चापि सूर्यप्रकाशेन प्रभाविता इव परिलक्ष्यन्ते । सूर्यरश्मिभिः स्पृष्टा जलाशयास्तरङ्गिता भवन्ति । वृक्षा लता गुल्माः पादपाः पत्राणि पुष्पाणि मञ्जर्यः फलानि च कामपि नव्यां शोभां दधते । समस्तायाः पृथ्व्याः सौन्दर्यं सूर्यकिरणानुप्राणितमुच्छ्वसतीव राजते । निखिलमपि स्थावरजङ्गमं जगत् सत्यं प्रियमानन्दमयमिवाभाति । प्रातः सूर्योदयसमयेऽस्वस्था रुग्णाः पीडिता अपि प्राणिनः किञ्चिदाश्वस्ता इव स्वास्थ्यं सुखं शांति चात्मनि सम्भावयन्ति । कोनु खल्वेवंविधो भवेत् सचेतनो यो हि सूर्यस्य प्रकाशोष्मणोः प्रभावं प्रत्यक्षमेव परिपतन्तं न स्वीकुर्वाणः स्यात् ? सूर्योदयादेवास्य विश्वस्य वृत्तिचक्रं गतिशीलं भवति, तदस्तमनेन च शैथिल्यं वा निवृत्तिं वाश्रयते । सूर्योदयादेव सापेक्षिकस्य कलनात्मकस्य कालस्य गणनारम्भो भवति येन प्राणा विकलाः कलाः पलानि घटिकाः प्रहरा दिवसा रात्र्यः सप्ताहाः पक्षौ मासा ऋतवोऽयनानि वर्षाणियुगादीनि च सर्वाणि जायन्ते । सूर्यस्य प्रकाशतापोष्मभिरेव मेघोत्पत्तिर्जलवर्षणमृतुपरिवर्तनं कृषिकर्मसु धान्यांकुर रोहा वृक्षादीनां विकाशोजलवायुशुद्धिः श्वेतपीतरक्तहरितकृष्णकर्बुरादीनां वर्णानां पृथक् पृथक् प्रतीतिर्दूषितबाष्पपरमाणूनां शोष इत्याद्याः परिणामा भवन्ति । संक्षेपादिदमेव निवेदनं पर्याप्तं यदणुपरमाणुपर्यन्तं सर्वमपि जगत् सूर्यसाक्षिकं स्पन्दते, स्वस्थितिं च परिपालयति । एवं सति सूर्यस्य तमिमं प्रत्यक्षं प्रभावं को नाम न मन्येत ? तत एवहि प्राचीना मन्त्रदृष्टारो महर्षयो नवीना वैज्ञानिकाश्च रविरश्मिषु जीवनदायकममृतमयं किमप्यविनाशितत्त्वं निहितं समर्थयन्ते । नवीना वैज्ञानिकास्तु स्वप्रयोगशालासु बहुयन्त्रोपकरणानां साहाय्येन लोकजीवनोपयोगिनां सूर्यकिरणान्तःस्थितानाम् तत्त्वानां (Cosmic Rays) ब्रह्माण्डकिरणाः, (Ultra

Violet Rays) अस्तित्वं सप्रमाणं योगसिद्धं चामनन्ति । सूर्योष्मणाग्नीन्धनविद्युच्छक्तिप्रयोगैर्यन्त्रसञ्चालनं कर्तुम् प्रयतन्ते वैज्ञानिकाः । नव्या वैज्ञानिकास्तु चन्द्रलोकयात्राम् भौमगुरुशुक्रमण्डलयात्रामपि कर्तुं चेष्टमानाः सन्ति । इत्थं सुदूरमूहापोहानन्तरं त्वज्ञाजडामन्दमतयो मूर्खाश्चापि सूर्यस्यातपप्रकाशोष्मणां प्रभावं स्वीकुर्युरेव किन्तु नवशिक्षितानां पुरतः–"सूर्य आत्मा जगतस्तस्थुषश्च"। अथवा "आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्" ॥१॥ किंवा "नवो नवो भवति जायमानोऽन्हां केतू रुचसामेत्यग्रं भागम् । विदधात्ययनं प्रचन्द्रमाः स्थिरं ते दीर्घमायुः ॥२॥ अपि च– "योऽसावादित्ये पुरुषः सोऽसावहम् ॥३॥" इत्यादीनि श्रुतिवचनानि गम्भीरज्ञानविज्ञानानुभवशबलानि समुच्चारणात् कोऽपि भारतीयः शास्त्रज्ञो विद्वान् वेदशास्त्र प्रामाण्यात् सूर्यस्य चान्येषां ग्रहाणां प्रभावसम्बन्धिनं सत्यसिद्धान्तं त्रिकालाबाधितं किलाव्यभिचारि प्रमाणयति तदा स्थूलधियोऽद्यतनाः केवलं भौतिकविज्ञानमेव विद्यासर्वस्वं मन्यमानाश्चाक्षुषप्रत्यक्षगम्येऽप्यत्र सुस्पष्टे विषये विप्रतिपद्यमानाः' सहसा सहमता न भवन्ति, नैव भवन्तीत्यहो तेषां बोधदारिद्रयमज्ञता ज्ञानरंकता चेति वक्तव्यं भवेत् ।

न केवलं सूर्यस्यैवैकलस्य भावोऽस्मिञ्जगतिविद्यते प्रत्यक्षं प्रत्युतान्येषामपि चन्द्रादीनां ग्रहाणामपि प्रकाशादीनां प्रभावो भवति नूनम् । विषयमेतं समधिकं स्पष्टीकर्तुमधुना सूर्यवच्चन्द्रस्यापि प्रभावविषये किञ्चिदुच्यते–चन्द्रस्तावज्जलपिण्डरूपः । अर्थाच्चन्द्रमसि जलीयतत्त्वानां तरलरसरूपाणामाधिक्यं वर्तते । स च पुनः सूर्यकिरणस्पर्शादेव प्रकाशते । स्वयं जलरूपोऽपि चन्द्रमाः सूर्यरश्मिभिः सम्पृक्तः शीतलां द्युतिं ज्योत्स्नारूपां सर्वतो दिक् प्रसारयति । तदेवाहुर्भास्कराचार्यवर्याः–

"तरणिकिरणसङ्गादेष पीयूषपिण्डो,
दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति ।
तदितरदिशि बालाकुन्तलश्यामलक्ष्मी–
र्घट इव निजमूर्तिश्छाययैवातपस्थः ॥१॥

सोऽयं चन्द्रः शीतलां द्युतिमात्मीयां विकिरञ्जागतिकान् सर्वांश्चेतनाचेतनान् प्रभावयति स्वचन्द्रिकाकिरणजालैः । यथा सूर्ये प्रकाशोष्णताधिक्यं तथैव चन्द्रे रसाधिक्यं शीताधिक्यं च वर्तते । यतश्चन्द्रकिरणानां प्रभावः शीतलो रसमयश्चाल्हादकरोऽनुभूयतेऽस्माभिः । चन्द्रस्य किरणानां सूक्ष्मप्रभावान्मनः प्रहृष्यति, जलं तरङ्गायते । वनस्पतिष्वोषधिषु रसात्मकेषु तरलद्रव्येषु च रसपरिपाकस्तरलतादयो गुणाः सम्भवन्ति । चान्द्रमसं ज्योतिर्जीवानां भौतिके देहे तथौषधिप्रभृतिषु पदार्थेषु च रसं पुष्णात्यमृतमयरश्मिभिस्तस्मादेवायमोषधि - पतिरित्युच्यते । मानवानाम् व्यष्टिपिण्डे मनस्तत्त्वप्रतिष्ठा चन्द्रमसएव भवति । तदेवोक्तं श्रुतौ– "चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१॥ इति । स्मृतिप्रस्थानेऽपि गीतासु भगवत्पादा इममेवार्थं प्राहुः–"पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥" (गीता, अध्यायः १५, श्लोकः १४) ।

पुनः सर्वेषां सचेतनानां प्राणिनां मनस्तत्त्वनिर्माणे चन्द्रमसस्तेजसो महत्त्वपूर्णः प्रभावो भवति । एवमेव सर्वेषामेव ग्रहाणां तत्तत्तेजोविशेषाणां प्रभावाः सचेतनेष्वचेतनेष्वपि चानिवार्यतया पतन्ति । प्रत्यक्षमनुभूयमानेऽस्मिन् विषये नास्त्येवाणीयानपि संदेहशंकावसरस्तथापि विषयस्यास्य स्पष्टीकरणाय सर्वेषामेव ग्रहाणाम् प्रभावविषये श्रीमद्वराहमिहिराचार्यैर्बृहज्जातके प्रोक्तमेतच्छन्दोऽवधीयतामत्र प्रसङ्गोपात्तम्:–

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्त्वं-कुंजोवचो,
जीवो ज्ञानसुखेसितश्च मदनो दुःखं दिनेशात्मजः ।
राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः,
सूरिर्दानवपूजितश्चसचिवौ प्रेष्यः सहस्रांशुजः ।।१।।"

अस्यायमभिप्रायो यत् सचेतनानां प्राणिनाम् किलात्मतत्त्वनिर्माणे सूर्यतेजसस्तन्मात्राणां, मनस्तत्त्वप्रतिष्ठायां चन्द्रमसः, बलसञ्चारे भौमस्य, वाग्विकाशे बुधस्य, ज्ञान-सुखयोः प्रतिष्ठायां बृहस्पतेः, कामसंकल्परचनायाम् शुक्रस्य, दुःखानुभूतिसंवेदनादितत्त्वावस्थितौ शनेश्च तेजस्तन्मात्राणां प्रामुख्येनोपयोगो भवति । एवं हि जीवे षुशासनाधिकारक्षमतानिर्माणे सूर्यचन्द्रयोः, नेतृत्वशक्तिसञ्चारे भौमस्य, क्रीडाप्रियत्वसौकुमार्यमार्दवादिगुणरचनायां बुधस्य, मन्त्रित्वराजनीतिज्ञतादिगुणक्षमतानिर्माणे गुरुशुक्रयोस्तथा च दूतत्वादिगुणर्निमितौ शनैश्चरस्य तेजसः सुमहान् प्रभावो भवति ।

नायं कल्पनाप्रसूतो भावात्मको वादविशेषः । वैज्ञानिकेन दृष्टिकोणेन विश्लेषणान्मनोबुद्धीन्द्रियगोचरो ज्ञानगम्योऽयं विषयः । वस्तुतो ग्रहाणां स्थितिः खगोले सौरमण्डले वर्तते । स्वस्वकक्षासु स्वकीयं गतिक्रममन्वटन्तो ग्रहास्तत्रत्ये वातावरणे स्वतेजसामाकर्षणविकर्षणाभ्यां ग्रहानन्यान्भूमिमण्डलं सर्वानपि खगोलस्थान् ज्योतिर्मयनक्षत्रतारकापिण्डान् प्रभावयन्तो भवन्ति, स्वयं चान्येषां तेजोरश्मिपुञ्जैः प्रभाविताः सन्तो निखिलब्रह्माण्डस्थलोकांस्तत्रस्थाञ्जडचेतनांश्च स्वप्रकाशावपातानुपातप्रमाणं प्रभावयितुं प्रभविष्णवो भवन्ति । अतोऽत्र सौरे जगति वर्तमानस्य ग्रहनक्षत्रमण्डलस्य यथार्थस्थितिपरिचयाय किञ्चिदुच्यतेऽधस्तात् :—

"भूमेः पिण्डः शशांकज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा
वृत्तैर्वृत्तोवृतः सन्मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठती हास्य पृष्ठे
निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात् ।।
।।१।।"

"सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव ।।२।।"

—श्रीमद्भास्कराचार्यः, सिद्धान्तशिरोमणौ

अत्र श्रीमद्भास्कराचार्यकृतं वासनाभाष्यमपि दृश्यताम्:—

योऽयं मृदनिलसलिलव्योमतेजोमय इतिपांचभौतिको भूमेः पिण्डो वर्तुलाकारस्तद्वहिःस्थैः शशांकादिकक्षावृत्तैरावृतः सन्ननन्याधारः स्वशक्त्यैव नियतं निश्चितं वियत्याकाशे तिष्ठति । तत्पृष्ठनिष्ठं च जगत् । सदनुजमनुजादित्यदैत्यम् । दनुजा दानवाः । मनुजा मानवाः । आदित्या देवाः । दैत्या असुराः । तैः समेतं समन्तात् तिष्ठति । शेषं स्पष्टार्थम् ।

श्रीमद्भास्कराचार्यैः सिद्धान्तशिरोमणेर्गोलाध्याये यद् भारतीयखगोलविज्ञानोक्तप्रकारेण ग्रहादीनां स्थानादिकमुपवर्णितं तत्र सर्वादौ केन्द्रमध्यवर्ति भूमण्डलं, ततो विधुबुध-शुक्र-सूर्य-भौम-गुरु-शनीनां कक्षावृत्तानि क्रमशो वर्तन्ते, ततो नक्षत्रमण्डलमास्त, इत्येव भारतीयज्यौतिषाचार्योक्तः खगोले भूमण्डलग्रहमण्डलानां कक्षाक्रमः ।

श्रीभास्कराचार्यवर्यैः स्वकीयस्य सिद्धान्तशिरोमणिग्रन्थस्य गोलाध्याये या ग्रहस्थितिर्भूमि केन्द्र मत्वा वर्णिता तां सम्यगवबोद्धुमेकं चित्रमधस्ताद्दीयते, तत्साहाय्येन पाठकाः स्पष्टं ज्ञातुं शक्नुयुः—

(क्रमशः)

वसन्तोत्सव (होलिका पर्व) सन्देशः

आचार्य धर्मदेवो विद्यामार्तण्डः (देवमुनिर्वानप्रस्थः)

सदा प्रसन्ना भवतेह सन्तः,
'वसन्तवल्लोक इहाचरन्तः ।'
दुःखं परेषामपि दूरयन्तः,
सद्धृदया देववरं स्मरन्तः ॥

देवोऽस्ति नित्यं करुणाकरोऽसौ,
शान्तेः प्रहर्षस्य विधायकोऽसौ ।
तमेव नित्यं मुदिता भजध्वं,
ध्याने तदीये सततं रमध्वम् ॥

लीला तदीया सुखदास्त्यनन्ता,
गायन्ति तां शुद्धधियो हि सन्तः ।
दिशन्ति नित्यं प्रदिशो हसन्ताः,
विलोक्य तां नित्यमिहारमध्वम् ॥

न रोदितुं विश्वमिदं विचित्रं,
विनिर्मितं तेन दयामयेन ।
अस्मान् सुतान् मोदयितुं सदासौ,
लीलां मनोज्ञां तनुते समन्तात् ॥

सन्मोदमत्ता भवताप्रमत्ताः,
स्वकीयधर्मं परिपालयन्तः ।
सदा हसन्तश्चरितैः पवित्रैः,
जनान् समस्तानपि हासयन्तः ॥

अयं वसन्तोत्सव एतमेव,
ददाति सन्देशमनुग्ररुपम् ।
'प्राञ्चो अगाम नृतये हसाय,'
वेदस्य सन्देशमिमं श्रृणुध्वम् ॥

गुरुकुल पत्रिका के नियम

१ 'गुरुकुल पत्रिका' मासिक है । यह प्रत्येक अंग्रेजी मास की १२, १३ तारीख को प्रकाशित होती है ।

२ यह आधी संस्कृत में तथा आधी हिन्दी में होती है । इस में कवर समेत प्रायः ४४ पृष्ठ होते हैं । वर्ष में एक या दो विशेषांक लगभग १२०-१५० पृष्ठों तक के होते हैं ।

३ इसमें प्रमुख रूप से लेख वैदिक-साहित्य, भारतीय-संस्कृति-सम्बन्धी होते हैं ।

४ वार्षिक मूल्य देश में ४) और विदेश में ७) है, जो धनादेश (मनीआर्डर) द्वारा ही "**सम्पादक : गुरुकुल-पत्रिका**" के नाम से आना चाहिए । ग्राहक कभी भी बन सकते हैं ।

५ लेख छोटे, सारगर्भित तथा मौलिक होने चाहिएं । शुद्ध, सुपाठ्यातथा कए ओर लिखे होने चाहिएं । लेख, कविता तथा समालोचनार्थ पुस्तकें (२ प्रतियां), परिवर्तनार्थ पत्र-पत्रिकाएं सम्पादक के नाम भेजनी चाहियें ।

६ किसी लेख अथवा कविता आदि के प्रकाशित करने या न करने, घटाने-बढ़ाने या संशोधन करने का अधिकार सम्पादक को है । बिना डाक खर्च भेजे अप्रकाशित कविता वा लेख लौटाये न जा सकेंगे ।

सम्पादक—गुरुकुल पत्रिका, डाकघर : गुरुकुल कांगड़ी
जिला : सहारनपुर (उ० प्र०)

(जनवरी १९७४ मासाङ्कतोऽग्रे)

अथ प्रकाशाभ्युदयानाम

डा. मंगलदेव शास्त्री

महाविद्यालयस्य द्वितीयोपाधिवितरणोत्सवोऽनुसन्धानसंस्थान-प्रारंभोत्सवश्च

१९४७ वर्ष इव १९४८ वर्षेऽपि ३०।१।१९४८ दिनांके महाविद्यालयस्य द्वितीयोपाधिवितरणोत्सवो निरवर्त्तत यथापूर्वं महता समुत्साहेन । तेनैव सह तस्मिन्नेव दिनांकेऽनुसन्धानसंस्थानप्रारम्भोत्सवोऽप्यभवत् । तस्मिन्नुत्सवे सभापतिरासीत् प्रान्तीय-शिक्षामन्त्री माननीय श्रीसंपूर्णानन्दः, प्रवक्ता च म० म० श्री पं० गिरिधरशर्मचतुर्वेदः ।

उत्सवद्वयानन्तरमामन्त्रितानां महानुभावानां विशेषातिथीनां च सभाजनार्थमुद्यानगोष्ठी प्रस्तुतासीत् । तस्याश्च प्रायेण समाप्तेरनन्तरमेव प्रस्थितेषु प्रस्थानोन्मुखेषु चातिथिषु सहसा विश्वस्य जगतो वज्राघात इव विश्ववन्द्यस्य महात्मनो गान्धेः प्राणहत्याया वृत्तान्तः श्रुतिपथमागतो वेपमानहृदयानां साश्रुमुखानां च सर्वेषामुपस्थितानाम् ।

स्वर्गस्थितानां सहसा नरकस्य दुःखसागरे पातनमिवान्वभूम सर्वेऽपि वयं तत्रोपस्थिताः !!! हा ! हन्त ! महद् दुर्भाग्यमेतन्न केवलं भारतस्य, किन्तु सर्वस्यापि जगतः !!!

सत्याहिंसावतारो वै चिरदास्यादमोचयत् ।
चारित्र्यस्य बलेनैव भारतं, महदद्भुतम् ।।१।।
विश्ववन्द्यो महात्मा यो दीनोद्धारायणः ।
सर्वोदयमहामन्त्रऋषिर्हन्त ! हतोऽद्य सः ।।२।।

हृदयोन्माथिनी वेदनैषा सर्वैरप्यन्वभावि तदा ।

उत्तरप्रदेशीय संस्कृतपाठशाला पुनर्व्यवस्था-समितिः

(१९४७–१९५०)

महाविद्यालयीयवृत्तान्तस्य मध्येऽस्याः समितेर्विषयेऽपि किञ्चित्कथनमावश्यकम् । महाविद्यालयस्य प्रधानाचार्यपदमधितिष्ठतो मम पदेन प्रदेशीय संस्कृतपाठशालाभिः सहापि नैकरूपः संबन्ध आसीदिति पूर्वमुक्तम् । ततश्चास्याः समितेरुल्लेखोऽत्र नैवाप्रासंगिकः ।

१७-११-१९४७ दिनाङ्के शासनेन समितिरेषा न्ययुज्यत । अस्याः सदस्या एवमासन्—

(१) डा० मङ्गलदेव शास्त्री, सभापतिः ।
(२) पं० त्रिभुवनप्रसादोपाध्यायः (संस्कृतपाठशालानिरीक्षकः) ।
(३) पं० अलगूरायशास्त्री (एम.एल. ए.) ।
(४) पं० कमलाकान्तमिश्रः (गोइनकासंस्कृतमहाविद्यालयस्य प्रधानाचार्यः) ।
(५) डाक्टर बाबूराम सक्सेनामहोदयः, प्रयागविश्वविद्यालयात् ।
(६) म० म० श्रीगिरिधरशर्मचतुर्वेदः ।
(७) श्रीहरिदत्तशास्त्री, संस्कृतपटलस्य सदस्यः (शिक्षासंचालकद्वारा नियुक्तः ।

पं० शिवनाथ झारखंडी (सरस्वती भवन पुस्तकालयाध्यक्षः) असदस्यो मन्त्री । परं शिवनाथझारखंडी महोदयस्य, स्वपदादवकाशग्रहणकारणात्तस्य मन्त्रित्वपदं १५।४।१९४८ दिनांके प्रथमं पं० श्रीकुबेरनाथशुक्लेन, तदनन्तरं च श्रीवीरेन्द्रेणाग्निहोत्रिणा गृहीतमासीत् ।

समितेः प्रगतिः प्रतिवेदनं तत्परिणामश्च

समितेः प्रथमाधिवेशनं २४–२७।६।१९४८ दिनांकेषु अन्तिमं चाधिवेशनं २३।३।१९५० दिनांकेऽभवत् ।

समित्या तत्तदुपायैः पूर्णसावधानतापूर्वकं स्वविचारणीयविषयाणां सम्यगध्ययनं विवेचनं च विधाय स्वकीयप्रतिवेदनं यथाविधि प्रस्तुतीकृत्य सर्वसंमत्या सहस्ताक्षरं स्वीकृत्य च स्वसभापते-र्डाक्टरमङ्गलदेवशास्त्रिणो द्वारा ६।४।१९५० दिनांके शासनसन्निधे प्रेषितम् ।

अज्ञातकारणैस्तत्प्रतिवेदनं न कदापि प्रकाशितमभवत् । प्रतिवेदनेन प्रकाश्यमानीया नैकपाठशालानां दुरवस्था कदाचित्तस्यैकं कारणं भवेत् । सभापतिना स्वयं निरीक्षितासु पाठशालासु यत्रतत्र मिथ्यापाठशालाः (= केवलमर्थोपार्जनार्थं तथा जनताया वञ्चनार्थमपि स्थापिताः पाठशालाः) अपि दृष्टिपथमागताः !

तथापि नात्र संदेहो यत्प्रतिवेदनेनानेन महदुपकृतं पाठशालानाम् । पाठशालानां प्रगत्यै यदपि कार्यम् (अध्यापकानां वेतनवृद्धिः, आर्थिकसहायताया वृद्धिः, तासां वर्गीकरणम्, निरीक्षकाणां संख्यायां वृद्धिरित्यादिकम्) शासनेन तदनन्तरं कृतं तस्य सर्वस्य मूले तदस्माकं प्रतिवेदनं तद्गताः प्रस्तावाश्चैव विद्यन्ते । तदत्र नः परमः सन्तोषः ।

प्रधानाचार्यपदादवकाशग्रहणम्, शिक्षा विशेषाधिकारिपदे नियुक्तिश्च (१९४८)

ममैतज्ज्ञातमासीद् यत् प्रधानाचार्यपदाद् अथवा राजकीयसेवाया मया ३०।६।१९४८ दिनांकेऽवकाशो ग्रहीतव्य इति । तत्कालपर्यन्तं न मया कोऽप्याकस्मिकोऽन्यप्रकारको वावकाशः कदाचिदपि गृहीत आसीत् ।

अतस्तस्यैव वर्षस्य जनवरीमासस्यानन्तरं मया कदाचिन्माननीयः शिक्षामन्त्री श्रीसम्पूर्णानन्दः पृष्टो यन्नियमानुसारमहं राजकीयसेवातः पूर्णावकाशग्रहणात् प्राग्भाविनमवकाशं ग्रहीतुमिच्छामि, किं तद् भगवतानुमतं भविष्यति ? तेन, तत्तद्योजनानां कार्यान्वयने ममोपयोगितामाकलय्य, तन्नानुमतम् । उक्तं च यद् भवतां राजकीयसेवाकालस्य, अवशिष्टकार्यस्य हेतोः, शासनेन वृद्धिः करिष्यत इति !

शिक्षामन्त्रिणामेष विचारः कथञ्चिद् निष्कारणं स्वभावतोऽस्मद्विरोधपरायणैः प्रतिक्रियावादिभिरवगतः । मम कार्यकालस्य वृद्धिस्तेषां नैवेष्टासीत् । तैर्गुप्तमन्त्रणा कृता । निर्धारितं च यदेकं संकीर्णविचारपराणां प्रतिक्रियावादिनां वाराणसेयवृद्धपण्डितानां शिष्टमण्डलं स्वविरोधप्रदर्शनार्थं प्रदेशीयमुख्यमन्त्रिणां श्रीगोविन्दवल्लभपन्तमहोदयानां सेवायामुपस्थितं भवत्विति । एतन्निश्चयानुसारं ते श्रीपन्तसेवायामुपस्थिता अभवन् । तत्समक्षं च कथमपि कृत्रिमोपायैः साश्रुमुखैस्तैः प्रभाववता नाटकीयप्रकारेण मम कार्यकालस्य वृद्धि प्रस्तावमुद्दिश्य स्वकीयस्तीव्रो विरोधो निवेदितः । कश्चित्प्रयागस्थो नाट्यकलापटुस्तेषां तस्मिन्निवेदने नेतृत्वमकरोत् । श्रीसंपूर्णानन्दोऽपि तत्रासीत् । तद्द्वारैव एष समाचारः शनैः शनैरन्येषामपि कर्णगोचरतां गतः ।

मम कार्यकालस्य वृद्ध्या तथाकथितधर्मस्य महाननर्थो भविष्यतीति श्रुत्वा सरलमतिना श्री पन्तेन कार्यकालवृद्धेः प्रस्तावं प्रति स्वकीया अरुचिः प्रदर्शिता । ततश्च मम कार्यकालवृद्धेः प्रसङ्गः सर्वथा समाप्त एव ।

ततः क्रमेण ममावकाशग्रहणस्य समय उपस्थितः । २८।६।१९४८ दिनांके तडित्संदेशः शासनसकाशात्प्राप्तो यत् ३०।६।१९४८ दिनांकेऽवकाशं गृह्णता मया प्रधानाचार्यपदाधिकारो म०म० श्रीनारायण, शास्त्रिखिस्ते महोदयाय (सरस्वतीभवनपुस्तकालयाध्यक्षाय) समर्पणीय इति ।

(क्रमशः)

महाकविश्रीव्यासगौरवम्

डा० अमरनाथ पाण्डेयः, एम० ए०, डी० फिल०

साहित्यसर्वस्वविधानदक्षो व्यासः कवीनां नृपतिर्बभूव ।
तस्य प्रकृष्टैः कविकर्मबन्धैरालोकिता लोकसमर्चिता ये ।। १

मनीषिलीलाभिरात्मबोधं राज्ञां चरित्रैर्व्यवहारकोषम् ।
मुनीन्द्रनिध्यातरहस्यरत्नं जग्रन्थ काव्ये जनताहिताय ।। २

व्यासस्य संयोजनया प्रसन्ना लोकाः प्रशंसन्ति तदीयवृत्तम् ।
ये ये प्रसङ्गा निहिता मनोज्ञास्तेषां गुरुत्वं प्रथितं कथासु ।। ३

वृत्ते महाभारतनामधेये तत्त्वं निगूढं विबुधैर्विमृष्टम् ।
व्याख्याकदम्बैरपि पूजितं यत् तद् भारतं भारतदेशरत्नम् ।। ४

शिक्षाप्रसन्नोक्तिविलासिनीनां दीप्तिः प्रकृष्टाऽविरतं चकास्ति ।
तत्र प्रगीतेषु महत्सु सम्पत् काचित् समिद्धा हृदि भावनीया ।। ५

आचारसन्तानसमेधितानि पर्वाणि सर्वत्र हितं वहन्ति ।
तेषां विलासः कविवृन्दपूज्यः सृष्टिश्च तेषां सरसा विभाति ।। ६

खिन्नं प्रसादयति बोधयति प्रमुग्धं ज्ञानप्रकाशकिरणैर्दिशति व्यवस्थाम् ।
नीतिं प्रसारयति भेदविधाभिरच्छां तद् भारतं जगति गौरवमातनोति ।। ७

भक्तिप्रवाहपरिपूरितदिग्विभागं सद्वृत्तबोधितकवीन्द्रगृहीतकाव्यम् ।
युद्धस्फुरद्भटसमर्चितपादपद्मं व्यासं मुनिं कविगुरुं शिरसा नमामि ।। ८

आयोधनेषु सुभटैर्निजबाहुदण्डैः शस्त्रास्त्रभूषितकरैः प्रकटीकृतं यत् ।
नीतेर्विलासकलयाऽचलया प्रणीतं तद्भारतेऽमरगिरा रचिते पवित्रे ।। ९

विज्ञानवैभवमनाकुलमादधानैर्योगार्थसिद्धिलतिकाञ्च समीहमानैः ।
प्रासङ्गिकैरमितभावकथावितानैराविष्कृतं किमपि वस्तु मदीयदेशे ।। १०

भारतं भारतं रत्नं लोके सर्वत्र विश्रुतम् ।
धार्यते हृदये सद्भिः सदा मङ्गलकाङ्क्षया ।। ११

इदमेव परं तीर्थं तपश्चेदमनुत्तमम् ।
मित्रं हितकरं लोके तत्समीपे सुखं महत् ।। १२

—✿—

सम्पादकीय टिप्पण्यः

निर्वाचनम्

१९७४ ईस्वीये फर्वरीमासे उत्तरप्रदेश ओडिसा मणिपुर नागालैण्ड पाण्डिचेरी प्रदेशेषु निर्वाचनं प्रायः सर्वत्र शान्तिपूर्णवातावरणे सुसम्पन्नमभूत्। निर्वाचनपरिणामामक्षिलक्ष्यी कृत्य साश्चर्यमिदं वक्तुं शक्यते यत् चमत्कारः समजनि। सर्वत्र सर्वक्षेत्रेषु भ्रष्टाचारः सोमातीतमहर्घता खाद्यवस्तूनां कृत्रिमोऽभावो विषदिग्धपदार्थानां मिश्रणमित्यादिनरकयातनाभिः प्रपीडिता जनता पुनरपि कांग्रेसदलं सत्तारूढं विदधाति नावलोकयन्तो किमप्यन्यदलं सिंहासनारोहणक्षमम्। नानुचितं तदेतदङ्गीकरणं यत् सामान्यजनतासु विशेषतोधःपतितेषु सत्तायाः प्रभावः स्वकार्यं करोत्येव। अद्याप्यस्माकं मनःस्थितिरोजोबहुला न विद्यते। एतादृशीं हीनदशामवाप्ताः स्म यदेकश्वासेन कांग्रेसाय गालिं वोटं चोभयं प्रदद्मः। केचन ब्रुवते यत् पञ्चषरूप्यकाणां सामयिकेन लाभेन परितुष्टा अज्ञाः किं सत्यं लोकतन्त्रोचितं निर्वाचनं कर्तुमर्हन्ति। नाहं कस्यापि विशिष्टदलस्य विरोधेऽस्मि। कांग्रेसो वा जनसंघो वा समाजवादो वा कम्युनिष्टो वा यो वा को वा भवेत् भारतवर्षे तु प्रायः सर्वे समनस्काः समधरातले संस्थिताः सन्ति, सन्ति चैकस्यैव क्षेत्रस्य मूलानि। परमोच्चशिखरस्थितां भारतीयसंस्कृतिमनुरुध्योपत्यकामेव सम्प्राप्ताः एते। परमतेजस्विनस्त्यागमूर्तयो राक्षसचाणक्यप्रभृतयो महामन्त्रिणोऽद्यापि दृष्टिपथं न याताः। अस्मन्मते तु २५ प्रतिशतं ३०प्रतिशतं वोटस्याप्तिः सिंहासनमारोढुं जनताया आदेश इति न मन्तव्यम्।

अन्यच्च, निर्वाच्यनिर्वाचकयोरुभयोरपि कश्चिद् योग्यतामानदण्डो निर्धारणीयः। तत्र निर्वाच्यस्त्यागी तपस्वी सुपठितः शिष्टैर्गुणैः समलंकृतः स्यात्। एवं निर्वाचकोऽपि कथञ्चित् पठितस्तु भवेत्। अनेन निर्वाचनेन जातिदोषो दृढमूलतां यातः। धनस्यापि निकृष्टः प्रभावः सर्वेषामुपरि पतितः। अतोऽस्मन्यते तादृशा नियमा विधातव्या येन सर्वमलापेतं शुद्धं पवित्रं निर्वाचनं जायेत।

गुजरातप्रदेशे विक्षोभः

गुजरातप्रदेशे यो विक्षोभः श्रूयते प्रत्यहं वृत्तपत्रेषु च पठ्यते। तेनानुमीयते यत् जनतायाः साम्प्रतं हि मनः परिवृत्तिमगात्। न तदद्यतनीयं शासनमभिवाञ्छति। तत्र विक्षोभस्य पूर्वं कारणं खाद्यवस्तूनां कृत्रिमोऽभाव एव विद्यते। यदि शासनं सर्वतोभद्रं शुद्धं यभविष्यत् तत्र तद् विरुद्धं जनान्दोलनमपि नाभविष्यत्। अतोऽस्यामवस्थायां दण्डेन शासनं नोचितम्। तत्र जनता यादृशं शासनमभिवाञ्छति तत् प्रदातव्यमित्यस्त्यस्माकं दृढोविश्वासः।

भारतीय प्राचीन राजनीति

लेखकः—स्व० श्री पं० भगवद्दत्तः बी० ए०

प्रकाशकः—रामलाल कपूरट्रस्ट, बहालगढ़, सोनीपत (हरयाणा, मूल्यम्—)७५ ।

मम सनामो दिवंगतः श्री पं०भगवद्दत्तः बी०ए० वेदादिसच्छास्त्राणां महान् विद्वान् आसीत्, इति सर्वे विजानन्त्येव । भारतीयैतिह्यसम्बन्धेऽपि अनेन विदुषाऽतीव पाण्डित्यपूर्णं प्राक्तनसाहित्यमवगाह्य सत्यपूर्णं 'भारतवर्ष का इतिहास' इति नामकं भागद्वयसंवलितं पुस्तकं प्रकाशितम् । एवमनेके ग्रन्था अनेन पण्डितवर्येण स्वजीवने विलिख्य प्रकाशिताः । भारतीयराजनीतिविषयेऽस्यां पुस्तिकायां स्वविचाराः सुष्ठुरूपेण दिग्दर्शिताः । मन्ये मनुस्मृत्यादिषु महाभारतादिमहाकाव्येषु कौटिल्याद्यर्थशास्त्रेषु विस्तरेण राजनीतिसम्बद्धा विचारा बहुशः प्रपञ्चिताः । तानेवाङ्गीकृत्य सूक्ष्मरूपेण दिग्दर्शनमस्यां पुस्तिकायां कृतं पण्डितवर्येण । सर्वैः पुरुषै र्विद्वद्भिश्च पुस्तिकैषाऽवश्यमवलोकनीयेति ।

पाणिनीयं शब्दानुशासनम्

प्रथमो भागः

प्रकाशकः—रामलालकपूर ट्रस्ट, बहालगढ़, सोनीपत (हरयाणा) सजिल्दम्—४) ।

पाणिनिव्याकरणस्य शुभ्रं यशो व्योमनि ज्योतिरिवार्कस्य सर्वत्र प्रसृतं विद्यते । पाश्चात्यविदुषां मते व्याकरणमिदं मानवमस्तिष्कस्य सर्वोत्तमकृतित्वेन जगति विराजते । पुराकालेऽष्टाध्यायीसाहाय्येन स्वल्पकाल एव व्याकरणाभिज्ञो भवति स्म । परं यदा प्रक्रियाग्रन्थानां प्रचारः समभवत् तदा दीर्घकालाध्ययनरतोऽपि विद्यार्थी पूर्णपाण्डित्यं न प्राप्नोति स्म । अतः पुनरपि अष्टाध्यायीक्रमेण व्याकरणस्याध्ययनं प्रचालनीयम् । प्रारम्भे सूत्राणां कण्ठस्थीकरणे पुस्तकमिदमतीव साहाय्यकरं विद्यते । अस्मिन् प्रस्तुतपुस्तके प्रदत्तानां परिशिष्टानां तथा लघुवृद्धादिपाठानां दर्शनेनास्य महत्त्वमधिकं सञ्जातम् ।

अस्मन्मते तु सूत्रसम्बद्धा वार्तिकगणादयोऽपि सूत्राणामधस्तात् यथोचितस्थाने निवेशनीया येन सूत्रसम्बद्धवार्तिकैस्तत् कार्यमवगतं भवेत् ।

भगवद्दत्तो वेदालंकारः
सम्पादकः

जनवरी १९७४ से आगे —

महर्षि दयानन्द की विश्वदर्शन को देन

(Contribution of Dayananda to world philosophy)

श्री प्रो. जयदेव वेदालंकार

पंचम परिच्छेद

आत्म-मीमांसा

चार्वाक दर्शन सम्पूर्ण सृष्टि की उत्पत्ति केवल प्रत्यक्ष प्रमाण को मानते हुए पृथिवी, जल और वायु नामक चार भूतों से मानता है। इस दर्शन में आकाश को स्वीकार नहीं किया गया है। क्योंकि आकाश का प्रत्यक्ष नहीं होता है। आकाश प्रत्यक्ष का विषय ही नहीं, अतएव सम्पूर्ण जगत् उपर्युक्त चार भूतों से ही बना है। इन्हीं चार भूतों के विशेष योग से चैतन्य की उत्पत्ति होती है।

